तथा ।
"यच्च किञ्चिज्जगत् सर्व्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्व्वं व्याप्य नारायणः
स्थितः ॥"
तथा ।
"प्रकृतेः पर एवान्यः स नरः पञ्चविंशकः ।
तस्येमानि च भूतानि नाराणीति प्रचक्षते ॥
तेषामप्ययनं यस्मात्तस्मान्नारायणः स्मृतः ॥"
कश्चिन्मन्वन्तरे नरनामकऋषेरपत्यतां गतः इति
नारायणः ॥ इत्यमरटीकायां भरतः ॥ * ॥
("नराणामयनाच्चापि ततो नारायणः स्मृतः ॥"
इति महाभारते । ५ । ७० । १० ॥)
अस्य स्वरूपो यथा,—
"श्रीकृष्णश्च द्विधारूपो द्विभुजश्च चतुर्भुजः ।
चतुर्भुजश्च वैकुण्ठे गोलोके द्विभुजः स्वयम् ॥
चतुर्भुजस्य पत्नी च महालक्ष्मीः सरस्वती ।
गङ्गा च तुलसी चैव देवी नारायणप्रिया ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे ६४ अध्यायः ॥
तस्य ध्यानं यथा,—
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् कनककुण्डलवान् किरिटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥"
इत्यादित्यहृदयम् ॥
अपि च ।
'शङ्खचक्रगदापद्मधरं कमललोचनम् ।
शुद्धस्फटिकसङ्काशं क्वचिन्नीलाम्बुजच्छविम् ॥
गरुड़ोपरिशुक्लाब्जपद्मासनगतं हरिम् ।
श्रीवत्सवक्षसं शान्तं वनमालाधरं परम् ॥
केयूरकुण्डलधरं किरीटमुकुटोज्ज्वलम् ।
निराकारं ज्ञानगम्यं साकारं देहधारिणम् ॥
नित्यानन्दं निरानन्दं सूर्य्यमण्डलमध्यगम् ।
मन्त्रेणानेन देवेशं विष्णुं भज शुभानने ! ॥"
इति कालिकापुराणे २२ अध्यायः ॥
तन्नाममाहात्म्यं यथा,—
"नारायणाच्युतानन्तवासुदेवेति यो नरः ।
सततं कीर्त्तयेत् भूमे ! याति मल्लयतां प्रिये ! ॥"
इति वराहपुराणम् ॥
"सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम् ।
गङ्गादिसर्व्वतीर्थेषु स्नातो भवति निश्चितम् ॥"
इति श्रीकृष्णजन्मखण्डे १०६, अध्यायः ॥
"नारायणेति शब्दोऽस्ति वागस्ति वशवर्त्तिनी ।
तथापि नरके मूढ़ाः पतन्तीह किमद्भुतम् ॥"
इति महाभारतम् ॥
तस्य तुष्टिजनककर्म्माणि यथा,—
श्रीकृष्ण उवाच ।
"कर्म्मणा येन विप्रेन्द्र ! तुष्टिर्मे हृदि जायते ।
क्रोधश्च तत् समस्तं ते कथयामि समासतः ॥
यो दयालुर्द्दिजश्रेष्ठ ! सर्व्वभूतेषु सर्व्वदा ।
अहङ्कारेण हीनश्च तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्म कुर्य्यान्मदर्थं यो धर्म्मं भक्तिसमन्वितः ।
व्रते यथार्थं एकन्नं तस्य तुष्टोऽस्म्यहं सदा ॥
मिष्टं वस्तु समासाद्य दत्त्वा मे योऽत्ति मानवः ।
मानापमानसहशस्तस्य तुष्टोऽस्म्यहं सदा ॥
सर्व्वभूतशरीरस्थं यो मां जानाति मानवः ।
परहिंसाविहीनो यस्तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्माणि कुरुते यस्तु सुविचार्य्य पुनः पुनः ।
गोब्राह्मणहितैषी च तस्य तुष्टोऽस्म्यहं सदा ॥
स्वयं निरुक्तं वचनं यत्नाद्द्यः परिपालयेत् ।
प्रपन्नं पाति यत्नाद्यस्तस्य तुष्टोऽस्म्यहं सदा ॥
दानान्यनुपकारिभ्यो यो ददाति द्विजोत्तम ! ।
मयि चित्तं सदा यस्य तस्य तुष्टोऽस्म्यहं सदा ॥
कर्म्मणा येन तुष्टोऽस्मि निरुक्तं तत् समासतः ॥"
तस्य रोषजनककर्म्माणि यथा,—
"रुष्टोऽस्मि कर्म्मणा येन विप्र ! वच्मि शृणुष्व
तत् ॥
परहिंसारतो यस्तु निर्द्दयः सर्व्वजन्तुषु ।
अहंयुः सर्व्वदा क्रुद्धः स मां नयति शत्रुताम् ॥
असत्यभाषी क्रूरश्च परनिन्दापरस्तु यः ।
परवर्त्तनविध्वंसी स मां नयति शत्रुताम् ॥
अदृष्टदोषौ पितरौ स्त्रीभ्रातृभगिनीस्तथा ।
मोहात्त्यजति मूढ़ो यः स मां नयति शत्रुताम् ॥
पितृनिर्भर्त्सनं यस्तु कुरुते मूढ़धीर्नरः ।
गुर्व्ववज्ञाश्च विप्रेन्द्र ! स मां नयति शत्रुताम् ॥
दम्पत्योर्भेदनं यस्तु हेतुमात्रेण केनचित् ।
कुरुते ब्राह्मणश्रेष्ठ ! स मां नयति शत्रुताम् ॥
विप्रस्वं देवताद्रव्यं परद्रव्यञ्च मानवः ।
हरते यस्तु विप्रेन्द्र ! स मां नयति शत्रुताम् ।
आरामच्छेदिनो ये च जलाशयविलोपिनः ।
ग्रामनाशकरा ये च तेषां रुष्टोऽस्म्यहं सदा ॥
परस्त्रियं समालोक्य विषादं यान्ति ये जनाः ।
प्रशंसन्ति पापचर्य्यां ये तेषां रुष्टोऽस्म्यहं सदा ॥
द्विषन्त्यनाथं ये मूढ़ा अनाथस्वं हरन्ति ये ।
विश्वासघातिनो ये च तेषां रुष्टोऽस्म्यहं सदा ॥
ये च गोवीर्य्यहन्तारो वृषलीपतयश्च ये ।
अश्वत्थघातिनो ये च तेषां रुष्टोऽस्म्यहं सदा ॥
ब्रह्मविष्णुमहेशानां मध्ये ये भेदकारिणः ।
वेदनिन्दाकरा ये च तेषां रुष्टोऽस्म्यहं सदा ॥
एकादश्यां भुञ्जते ये मोहात् पापधियो नराः ।
परदारानुरक्ता ये तेषां रुष्टोऽस्म्यहं सदा ॥
पापबुद्धिप्रदा ये च ये च मित्रद्रुहो द्विज ! ।
धात्रीतरुञ्च ये घ्नन्ति तेषां रुष्टोऽस्म्यहं सदा ॥
दिवसे मैथुनं ये च कुर्व्वते काममोहिताः ।
रजस्वलां स्त्रियं यान्ति तेषां रुष्टोऽस्म्यहं सदा ॥
ये च हृष्टातुरां नारीं मोहाद्गच्छन्ति सत्तम ! ।
व्रतस्थाश्च सदा ते मां नयन्ति शत्रुतां भुवि ॥
अमावास्यातिथौ ये च कुर्व्वते निशिभोजनम् ।
भोजनद्वयमेकाहे तेषां रुष्टोऽस्म्यहं सदा ॥
आमिषं मैथुनं तैलममावास्यादिने द्विजाः ।
न ये त्यजन्ति विप्रेन्द्र ! तेषां रुष्टोऽस्म्यहं सदा ॥
बहुनात्र किमुक्तेन संक्षेपात्तं वदाम्यहम् ।
निन्दन्ति वैष्णवान् ये च तेषां रुष्टोऽस्म्यहं
सदा ॥"
इति क्रियायोगसारे १८ अध्यायः ॥
अजामिलपुत्त्रः । यथा,—
"कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः ।
नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः ॥
तस्य प्रवयसः पुत्त्रा दश तेषान्तु योऽवमः ।
बालो नारायणो नाम्ना पित्रोश्च दयितो भृशम् ॥
दूरे क्रीड़नकासक्तं पुत्त्रं नारायणाह्वयम् ।
प्लावितेन स्वरेणोच्चैराजुहावाकुलेन्द्रियः ॥
निशम्य म्रियमाणस्य मुखतो हरिकीर्त्तनम् ।
भर्त्तुर्नाम महाराज ! पार्षदाः सहसापतन् ॥
विकर्षतोऽन्तर्हृदयाद्दासीपतिमजामिलम् ।
यमप्रेष्यान् विष्णुदूता वारयामासुरोजसा ॥"
इति श्रीभागवते षष्ठस्कन्धे प्रथमाध्यायः ॥
सैन्यविशेषः । यथा,—
"मत्संहननतुल्यानां गोपानामर्व्वुदं महत् ।
नारायणा इति ख्याताः सर्व्वे संग्रामयोधिनः ॥"
"दुर्य्योधनश्च तत् सैन्यं सर्व्वमावारयत्ततः ।
सहस्राणां सहस्रञ्च योधानां प्राप्य भारत ! ॥"
इति महाभारते । ५ । ७ अध्यायः ॥
धर्म्मपुत्त्रर्षिविशेषः । यथा,—
"धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्त्यां
नारायणो नर इति स्वतपःप्रभावः ॥"
इति श्रीभागवते । २ । ७ । ६ ॥
"दण्डग्रहणमात्रेण नरो नारायणो भवेत् ॥"
इति यतिधर्म्मः ॥
(कृष्णयजुर्व्वेदान्तर्गतोपनिषद्विशेषः । यथा,
मुक्तिकोपनिषदि ।
"गर्भो नारायणो हंसो बिन्दुर्नादशिरःशिखा ॥"
चूर्णौषधिविशेषः । यथा, भावप्रकाशे उदर-
रोगाधिकारे ।
"यवानी हपुषा धान्यं त्रिफला चोपकुञ्चिका ।
कारवी पिप्पलीमूलमजगन्धा शटी वचा ॥
शताह्वा जीरको व्योषं स्वर्णक्षीरी च चित्रकम् ।
द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥
विड़ङ्गञ्च समांसानि दन्त्या भागत्रयं भवेत् ।
त्रिवृद्विशाले द्विगुणे सातला स्याच्चतुर्गुणा ॥
एष नारायणो नाम्ना चूर्णो रोगगणापहः ।
एनं प्राप्य निवर्त्तन्ते रोगा विष्णुमिवासुराः ॥
तक्रेणोदरभिः पेयो गुल्मिभिर्व्वादराम्बुना ।
आनद्धवाते सुरया वातरोगे प्रसन्नया ॥
दधिमण्डेन विड़्बन्धे दाड़िमाम्बुभिरर्शसे ।
परिकर्त्तेषु वृक्षाम्लैरुष्णाम्बुभिरजीर्णके ॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे ।
हृद्रोगे ग्रहणीरोगे कुष्ठे मन्देऽनले ज्वरे ॥
दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे ।
यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम् ॥")
नारायणक्षेत्रं, क्ली, (नारायणस्य क्षेत्रं स्थानम् ।)
गङ्गाप्रवाहावधिहस्तचतुष्टयमितनारायणस्वा-
मिकस्थानम् । यथा, ब्रह्मपुराणे ।
"प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयम् ।
अत्र नारायणः स्वामी नान्यः स्वामी कदाचन ॥"
"अत्र किञ्चिन्न दद्याच्च साक्षात् पात्राय पुण्य-
वान् ।